**पुरमार्ग** पु० ६त० । नगरमार्गे कुमा० ४।११ श्लो० ।

**पुरमालिनी** स्त्री नदीभेदे भा०भी० ६अ० ।

**पुरय** पु० नृपभेदे रू० ६।६२।८ भा० ।

**पुररक्ष** पु० पुरं रक्षति रक्ष–अण् उप०स०। नगररक्षके स्त्रियां ङीप् । इति ६त० । पुररक्षिन् तत्रार्थे ।

**पुरला** स्त्री पुर–कलच् । दुर्गायां हेमच० ।

**पुरवासिन्** त्रि० पुरे वसति णिनि । नगरवासिनि पौरे जने स्त्रियां ङीप् ।

**पुरशासन** पु० पुरं शास्ति शास–ल्यु । महादेवे कुमा०७।३०

**पुरश्चरण** न० पुरस्+चर–भावे ल्युट् । १अग्रत आचरणे तन्त्रोक्ते २गृहीतमन्त्रसिद्धिहेतुप्रयोगभेदे तत्प्रकारादि तन्त्रसारे उक्तं यथा

"अथ पुरश्चरणं योगिनीहृदये "गुरोराज्ञां समादाय शुद्धान्तःकरणो नरः । ततः पुरस्क्रियां कुर्य्यान्मन्त्रसंसिद्धिकाम्यया" । तस्य नित्यतामाह "जीवहीनो यथा देही सर्वकर्मसु न क्षमः । पुरश्चरणहीनोऽपि तथा मन्त्रः प्रकीर्त्तितः । तस्मादादौ स्वयं कुर्य्याद्गुरुं वा कारयेद्बुधः" योगिनीहृदये "गुरोरभावे विप्रं वा सर्वप्राणिहिते रतम् । स्निग्धं शास्त्रविदं मित्रं नानागुणसमन्वितम् । स्त्रियं वा सद्गुणोपेतां सपुत्रां विनियोजयेत् । आदौ पुरस्क्रियां कर्त्तुं स्थाननिर्णय उच्यते" । योगिनीहृदये "पुण्यक्षेत्रं नदीतीरं गुहा पर्वतमस्तकम् । तीर्थप्रदेशाः सिन्धूनां सङ्गमः पावनं वनम् । उद्यानानि विविक्तानि बिल्वमूलं तटं गिरेः । तुलसीकाननं गोष्ठं वृषशून्यं शिवालयम् । अश्वत्थामलकीमूलं गोशाला जलमध्यतः । देवतायतनं कूलं समुद्रस्य निजं गृहम् । साधने तु प्रशस्तानि स्थानान्येतानि मन्त्रिणाम् । अथ वा निवसेत्तत्र यत्र चित्तं प्रसीदति" । वायवीयसंहितायामपि "सूर्यस्याग्ने गुरोरिन्दोर्दीपस्य च जलस्य च । विप्राणाञ्च गवां चैव सन्निधौ शस्यते जपः" । तथा "गृहे शतगुणं विद्याद्गोष्ठे लक्षगुणं भवेत् । कोटिर्देवालये पुण्यमनन्तं शिवसन्निधौ । गृहे गोष्ठे तड़ागे च नदीनदशिवालये । गुरोर्वा सन्निधिर्यत्र स जपः परमोमतः । म्लेच्छदुष्टमृगव्यालशङ्कातङ्कविवर्जिते । एकान्तपावने निन्दारहिते भक्तिसंयुते । स्वदेशे धार्मिके देशे सुभिक्षे निरुपद्रवे । रम्ये भक्तजनस्थाने निवसेत्तापसः प्रिये ! । गुरूणां सन्निधाने च चित्तैकाग्र्यस्थले तथा । प्रेतभूम्यादिकञ्चैव तत्तत्कल्पप्रकाशितम् । एषामन्यतमं स्थानमाश्रित्य जपमाचरेत् । यत्र ग्रामे जपेन्मन्त्री तत्र कूर्मं विचिन्तयेत्" गौतमीये "पर्वते सिन्धुतीरे वा पुण्येऽरण्ये नदीतटे । यदि कुर्य्यात् पुरश्चर्य्यां तत्र कूर्मं न चिन्तयेत् । ग्रामे वा यदि वा वास्तौ गृहे तत्र विचिन्तयेत्" रुद्रयामले "जपमेकगुणं गेहे गोष्ठे दशगुणं भवेत् । वनान्तरे शतगुणं तड़ागे च सहस्रकम् । नदीतीरे लक्षगुणं नगाग्रे कोटिसम्मितम् । शिवालये कोटिशतमनन्तं गुरुसन्निधौ" । अथ पुरश्चरणे भक्ष्यादिनियमाः गौतमीये "पुरश्चरणकृन्मन्त्री तत्र भक्ष्यं विवेचयेत् । अन्यथा भोजनाद्दोषात् सिद्धिहानिः प्रजायते । शस्तान्नञ्च समश्नीयान्मन्त्रसिद्धिसमीहया । तस्मान्नित्यं प्रयत्नेन शस्तान्नाशी भवेन्नरः" । अगस्त्यसंहितायाम् "तिलाश्चैव सितामुद्गाः कन्दः केसुकवर्जितः । नारिकेलफलञ्चैव कदली लवनी तथा । आम्रमामलकञ्चैव पनसञ्च हरीतकी । व्रतान्तरे प्रशस्तञ्च हविष्यं मन्यते बुधैः" । व्रतान्तर इति "हैमन्तिकं सितास्विन्नं धान्यं मुद्गास्तिला यवाः । कलायकङ्गुनीवारा वास्तूकं हिलमोचिका । षष्टिकाः कालशाकानि मूलकं केमुकेतरत् । लवणे सिन्धुसामुद्रे गव्ये च दधिसर्पिषी । पयोऽनुद्धृतसारञ्च पनसाम्रहरीतकी । पिप्पलीजीरकञ्चैव नागरङ्गकतिन्तिडी । कदली लवनी धात्री फलान्यगुडमैक्षवम् । अतैलपक्वं मुनयो हविष्यान्नं प्रचक्षते । भुञ्जानो वा हविष्यान्नं शाकं यावकमेव वा । पयोमूलं फलं वापि यत्र यत्रोपलभ्यते । रम्भाफलं तिन्तिडीकं कमलानागरङ्गकम् । फलान्येतानि भोज्यानि एभ्योऽन्यानि विवर्जयेत्" यत्तु योगिनीतन्त्रे "चिञ्चाञ्च नालिकाशाकं कलायं लकुचन्तथा । कदम्बं नारिकेलञ्च व्रते कुष्माण्डकं त्यजेत्" इति तत्तु व्रतान्तरे बोद्धव्यम् । तथा वर्ज्यानि "विवर्जयेन्मधुक्षारलवणं तैलमेव च । ताम्बूलं कांस्यपात्रञ्च दिवाभोजनमेव च" । तथा "क्षारञ्च लवणं मांसं गृञ्जनं कांस्यभोजनम् । माषाढकीमसूरांश्च चनकान् कोद्रवानपि । कौटिल्यं क्षौरमभ्यङ्गमनिवेदितभोजनम् । असङ्कल्पितकृत्यञ्च वर्जयेन्मर्दनादिकम् । स्नायाच्च पञ्चगव्येन केवलामलकेन वा । मन्त्रजाप्यन्नपानीयैः स्नानाचमनभोजनम् । कुर्य्याद्यथोक्तविधिना त्रिसन्ध्यं देवतार्चनम् । अपवित्रकरो नग्नः शिरसि प्रावृतोऽपि वा । प्रलपन् प्रजपेद्यावत्तावन्निष्फलमुच्यते" । नारदीये "मृदु सोष्णं